न धूप इति मन्यन्ते धूपान्तरविधानतः ।
सितागुरुमघोराख्ये मुखे कृष्णागुरुं पुनः ॥
पौरुषे गुग्गुलुं सद्ये सौम्ये सौगन्धिकं मुखे ।
ईशानेऽपि उशीरादि दद्याद्धूपं विशेषतः ॥
शर्करामधुकर्पूरकपिलाघृतसंयुतम् ।
चन्दनागुरुकाष्ठाद्यं सामान्यं संप्रचक्षते ॥
कर्पूरवर्त्तिराज्याढ्या देया दीपावली ततः ।
अर्घ्यमाचमनं देयं प्रतिवक्त्रमतःपरम् ॥
प्रथमावरणे पूज्यौ क्रमाद्धेरम्बषण्मुखौ ।
ब्रह्माङ्गानि ततश्चैवं प्रथमावरणेऽर्च्चिते ॥
द्वितीयावरणे पूज्या विघ्नेशाश्चक्रवर्त्तिनः ।
तृतीयावरणे पूज्या भवाद्याश्चाष्टमूर्त्तयः ॥
महादेवादयस्तत्र तथैकादशमूर्त्तयः ।
चतुर्थावरणे पूज्याः सर्व्व एव गणेश्वराः ॥
बहिरेव तु पद्मस्य पञ्चमावरणे क्रमात् ।
दश दिक्पतयः पूज्याः सास्त्राः सानुचरास्तथा ॥
ब्रह्मणो मानसाः पुत्त्राः सर्व्वेऽपि ज्योतिषाङ्गणाः ।
सर्व्वे देवाश्च देव्यश्च सर्व्वाः सर्व्वेऽपि खेचराः ॥
पातालवासिनश्चान्ये सर्व्वे मुनिगणा अपि ।
योगिनो मुख्यतः सर्व्वे पञ्चमे मातरस्तथा ॥
क्षेत्रपालश्च सगणः सर्व्वं चैतच्चराचरम् ।
अथावरणपूजान्ते सम्पूज्य परमेश्वरम् ॥
साज्यं सव्यञ्जनं हृद्यं हविर्भक्त्या निवेदयेत् ।
मुखवासादिकं दत्त्वा ताम्बूलं सोपदंशकम् ॥
अलङ्कृत्य च भूयोऽपि नानापुष्पविभूषणैः ।
नीराजनान्ते विस्तीर्णं पूजाशेषं समापयेत् ॥
चन्द्रसङ्काशहारञ्च शयनीये समर्पयेत् ।
आढ्यं नृपोचितं हृद्यं तत्सर्व्वमनुरूपतः ॥
कृत्वा च कारयित्वा च हुत्वा च प्रतिपूजनम् ।
स्तोत्रं व्यपोहनं जप्त्वा विद्यां पञ्चाक्षरीं जपेत् ॥
प्रदक्षिणां प्रणामञ्च कृत्वात्मानं समर्पयेत् ।
ततः पुरस्ताद्देवस्य गुरुर्विद्ये च पूजयेत् ॥
दत्त्वार्घ्यमष्टौ पुष्पाणि देवमुद्वास्य लिङ्गतः ।
अग्नेश्चाग्निं सुसंरक्ष्य उद्वास्य च तमच्युत ॥
प्रत्यहं जन इत्येवं कुर्य्यात्सर्व्वं पुरोदितम् ।
ततस्तत्साम्बुजं लिङ्गं सर्व्वोपकरणान्वितम् ॥
समर्पयेत् स्वगुरवे स्थापयेद्वा शिवालये ।
संपूज्य च गुरून्व्यान् व्रतिनश्च विशेषतः ॥
भक्तान् द्विजांश्च शक्तश्चेद्दीनानाथांश्च तोषयेत् ।
स्वयं चानशनप्रायः फलमूलाशनोऽथवा ॥
पयोव्रती वा भिक्षाशी भवेदेकाशनस्तथा ।
नक्तं युक्ताशनो नित्यं भूशय्यानिरतः शुचिः ॥
भस्मशायी तृणे शायी चीराजिनधरोऽथवा ।
ब्रह्मचर्य्यरतो नित्यं व्रतमेतत् समाचरेत् ॥
अर्कवारे तथार्द्रायां पञ्चदश्याञ्च पक्षयोः ।
अष्टम्याञ्च चतुर्द्दश्यां शक्तस्तूपवसेदपि ॥
पाषण्डपतितोदक्याश्छतिकान्त्यजपूर्व्वकान् ।
वर्ज्जयेत्सर्व्वयत्नेन मनसा कर्म्मणा गिरा ॥
क्षमादानदयासत्याहिंसाशीलः सदा भवेत् ।
सन्तुष्टश्च प्रशान्तश्च तपोध्यानरतः सदा ॥
कुर्य्यात्त्रिषवणस्नानं भस्मस्नानमथापि वा ।
पूजां वैशेषिकीञ्चैव मनसा कर्म्मणा गिरा ॥
बहुनात्र किमुक्तेन नाचरेदशिवं व्रती ।
प्रमादात्तु तथाचारे निरूप्य गुरुलाघवम् ॥
उचितां निष्कृतिं कुर्य्यात् पूजाहोमजपादिभिः ।
आसमाप्तेर्व्रतस्यैवमाचरेन्न प्रमादतः ॥
गोदानञ्च वृषोत्सर्गं कुर्य्यात् पूजां जपं सदा ।
सामान्यमेतत् कथितं व्रतस्यास्य समासतः ॥
प्रतिमासं विशेषञ्च प्रवक्ष्यामि यथाक्रमम् ।
वैशाखे वज्रलिङ्गन्तु ज्यैष्ठे मारकतं शुभम् ॥
आषाढे मौक्तिकं विद्याच्छ्रावणे नीलनिर्म्मितम् ।
मासे भाद्रपदे चैव पद्मरागमयं परम् ॥
आश्वयुज्याञ्च विधिवद्गोमेदकमयं शुभम् ।
कार्त्तिक्यां वै इदं लिङ्गं वैदूर्य्यं मार्गशीर्षके ॥
पुष्परागमयं पौषे माघे द्युमणिजं तथा ।
फाल्गुन्यां चन्द्रकान्तोत्थं चैत्रे तद्द्वयोरथवा ॥
सर्व्वमासेषु रत्नानामलाभे हैममेव वा ।
हैमाभावे राजतं वा ताम्रं शैलजमेव वा ॥
मृण्मयं वा यथालाभं क्षणिकं चान्यदेव वा ।
सर्व्वगन्धमयं वाथ लिङ्गं कुर्य्याद्यथारुचि ॥
व्रतावसानसमये समाचरितनैत्यकः ।
कृत्वा वैशेषिकीं पूजां हुत्वा चैव यथा पुरा ॥
संपूज्य च सदाचार्य्यं व्रतिनश्च विशेषतः ।
देशिकेनाभ्यनुज्ञातः प्राङ्मुखो वाप्युदङ्मुखः ॥
दर्भासनो दर्भपाणिः प्राणापानौ नियम्य च ।
जपित्वा शक्तितो मूलं ध्यात्वा शाम्बं त्रियम्बकम् ॥
अनुज्ञाप्य यथापूर्व्वं नमस्कृत्य कृताञ्जलिः ।
समुत्सृजामि भगवन् ! व्रतमेतत्त्वदाज्ञया ॥
इत्युक्त्वा लिङ्गमूलन्तु दर्भानुत्तरतस्त्यजेत् ।
ततो दण्डजटाचीरमेखलाद्यपि चोत्सृजेत् ॥
पुनराचम्य विधिवत् पञ्चाक्षरमुदीरयेत् ।
यः कृत्वात्यन्तिकीं दीक्षामादेहान्तमनाकुलः ॥
व्रतमेतत् प्रकुर्व्वीत स तु वै नैष्ठिकः स्मृतः ।
सोऽत्याश्रमी च विज्ञेयो महापाशुपतस्तथा ॥
स एव तपसां श्रेष्ठः स एव च महाव्रती ।
न तेन सदृशः कश्चित् कृतकृत्यो मुमुक्षुषु ॥
यतिर्यो नैष्ठिको जातस्तमाहुर्नैष्ठिकोत्तमम् ।
योऽन्वब्दाद्दशाहं वा व्रतमेतत् समाचरेत् ॥
सोऽपि नैष्ठिकतुल्यः स्यात्तीव्रव्रतसमन्वयात् ।
घृताक्तो यश्चरेदेतद्व्रतं व्रतपरायणः ॥
द्वित्रैकदिवसं वापि स च कश्चन नैष्ठिकः ।
कृत्यमित्येव निष्कामो यश्चरेद् व्रतमुत्तमम् ॥
शिवार्पितात्मा सततं न तेन सदृशः क्वचित् ।
भस्मच्छन्नो द्विजो विद्वान् महापातकसम्भवैः ॥
पापैर्विमुच्यते सद्यो मुच्यते नात्र संशयः ।
रुद्राग्नेर्यत्परं वीर्य्यं तद्भस्म परिकीर्त्तितम् ॥
तस्मात्सर्व्वेषु कालेषु वीर्य्यवान् भस्मसंयुतः ।
भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसङ्गमात् ॥
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः ।
भस्मना दिग्धसर्व्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः ॥
भस्मशायी च पुरुषो भस्मकल्मषभक्षणात् ।
भूतिर्भूतिकरी पुंसां रक्षा रक्षाकरी परम् ॥
किमन्यदिह वक्तव्यं भस्ममाहात्म्यकारणम् ।
व्रती च भस्मना स्नातः स्वयं देवो महेश्वरः ॥
परमास्त्रञ्च शैवानां भस्मैतत्पारमेश्वरम् ।
धौम्याग्रजस्य तपसि व्यापदो यन्निवारिताः ॥
तस्मात्सर्व्वप्रयत्नेन कृत्वा पाशुपतं व्रतम् ।
धनवद्भस्म संगृह्य भस्मस्नानरतो भवेत् ॥”
इति श्रीशिवपुराणे वायुसंहितायां पूर्व्वभागे एकोनत्रिंशोऽध्यायः ॥ * ॥)

पाशुपतास्त्रं, क्ली, (पाशुपतं पशुपतिसम्बन्धि अस्त्रम् ।) पशुपतेः शूलास्त्रम् । तस्य स्वरूपं यथा,—
“गजाननोऽपि संचिन्त्य यत्तत् पाशुपतं परम् ।
महारूपं महाकायं युगान्ताग्निसमप्रभम् ॥
पञ्चवक्त्रं महाघोरं दशबाहुं त्रिलोचनम् ।
सौम्यं घोरं सुघोरास्यमृद्वंक्रेशं भयोत्कटम् ॥
जटाभारेन्दुगङ्गाहिशिरोमाणं शिवाङ्गजम् ।
वेणुवीणाशङ्खघण्टं डमरुकारावसंकुलम् ॥
शिवारावं भयात्त्रासि गृध्रवायसचेष्टितम् ।
उल्कादण्डज्वलज्ज्वालं गोनाशकृतभूषणम् ॥
ललज्जिह्वलनागेन्द्रं गजचर्म्मार्द्रवाससम् ।
केकरं तर्ज्जमानन्तु शूलखट्वाङ्गधारिणम् ॥
ग्रसमानं समिदं त्रैलोक्यं सचराचरम् ।
पुरतो विघ्ननाशस्य लेलिहानं व्यवस्थितम् ॥”
इति देवीपुराणम् ॥

पाशुपाल्यं, क्ली, (पशुपालस्य भावः कर्म्म वा । पशुपाल + ष्यञ् ।) वैश्यवृत्तिः । पशून् गोमहिष्यादीन् पालयति पशुपालः ढात् षण् । पशुपालस्य भावः कर्म्म वा इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । इत्यमरभरतौ ॥ (यथा, मार्कण्डेये।२८।६।
“दानमध्ययनं यज्ञो वैश्यस्यापि त्रिधैव सः ।
वाणिज्यं पाशुपाल्यञ्च कृषिश्चैवास्य जीविका ॥”)

पाश्चात्यः, त्रि, (पश्चात् + “दक्षिणापश्चात्पुरसस्त्यक् ।” ४ । २ । ९८ । इति त्यक् ।) पश्चाद्भवः । (यथा, देवीभागवते । १ । १७ । ६६ ।
“पाश्चात्यं यामिनीयामं ध्यानमेवान्वपद्यत ।
स्नात्वा प्रातः क्रियाः कृत्वा पुनरास्ते समाहितः ॥”)
पश्चिमदेशजातः । इति मुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । १ । १२१ । ११ ।
“स विजित्य गृहीत्वा च भूपतीन् राजसत्तमः ।
प्राच्यानुदीच्यान् पाश्चात्यान् दाक्षिणात्यानकालयत् ॥”)

पाश्चात्याकरसम्भवं, क्ली, (पाश्चात्ये पश्चिमदिग्भवे आकरे सम्भव उत्पत्तिर्यस्य ।) शाम्भरीलवणम् । तत्पर्य्यायः । रोमकम् २ रामलवणम् ३ । इति रत्नमाला ॥

पाश्या, स्त्री, (पाशानां समूहः । पाश + “पाशादिभ्यो यः ।” ४ । २ । ४९ । इति यः ।) पाशसमूहः । इत्यमरः । ३ । २ । ४३ ॥

पाषकः, पुं, (पषति बध्नातीव चरणौ । पष बन्धे + ण्वुल् ।) पादाभरणविशेषः । पायजी इति भाषा ॥ यथा,—
“रत्नपाषकषट्कैश्च विराजितपदाङ्गुलैः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ४ अध्यायः ॥